योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०५९

एकोनषष्टितमः सर्गः ५९

श्रीवसिष्ठ उवाच ।

एतां दृष्टिमवष्टभ्य राघवाऽघविनाशिनीम् ।

तिष्ठ निःसङ्गसंन्यासब्रह्मार्पणमयात्मकः ।। १

यस्मिन्सर्वं यतः सर्वं यः सर्वं सर्वतश्च यः ।

यश्च सर्वमयो नित्यमात्मानं विद्धि तं परम् ।। २

दूरस्थमप्यदूरस्थं सर्वगं तत्स्थमेव च ।

तत्स्थः सत्तामवाप्नोषि तदेवास्यस्तसंशयः ।। ३

यत्संवेद्यविनिर्मुक्तं संवेदनमनिर्मितम् ।

चेत्यमुक्तं चिदाभासं तद्विद्धि परमं पदम् ।। ४

सा परा परमा काष्ठा सा दृशां दृगनुत्तमा ।

सा महिम्नां च महिमा गुरूणां सा तथा गुरुः ।। ५

स आत्मा तच्च विज्ञानं स शून्यं ब्रह्म तत्परम् ।

तच्छ्रेयः स शिवः शान्तः सा विद्या सा परा स्थितिः ।। ६

योऽयमन्तश्चितेरात्मा सर्वानुभवरूपकः ।

यत्र स्वदन्ते सर्वाणि स्वात्मद्रव्याणि सत्तया ।। ७

स जगत्तिलतैलात्मा स जगद्गृहदीपकः ।

स जगत्पादपरसः स जगत्पशुपालकः ।। ८

स तन्तुर्भूतमुक्तानां परिप्रोतहृदम्बरः ।

स भूतमरिचौघानां परमा तीक्ष्णता तथा ।। ९

स पदार्थे पदार्थत्वं स तत्त्वं यदनुत्तमम् ।

स सतो वस्तुनः सत्त्वमसत्त्वं वा सतः स्वतः ।। १०

यः स्ववित्तिविचित्रेण स्वयमात्मैव लभ्यते ।
सर्व एव जगद्भावा अविचारेण चारवः ।। ११
अविद्यमानाः सद्भावा विचारविशरारवः ।
अहमादौ जगज्जाले मिथ्याभ्रमभरात्मनि ।। १२
को नु भूत्वाऽनुबध्नामि वृत्तिं कथमवाप धीः ।
आद्यमध्यान्तमानानि संकल्पकलनान्यहम् ।। १३
ब्रह्माकाशमनाद्यन्तं केवेयत्ता ममात्मनः ।
इति निश्चयवानन्तः सम्यग्व्यवहृतिर्बहिः ।। १४
उदयास्तमयोन्मुक्तस्थितिरन्तः स सर्वदा ।
नास्तमेति न चोदेति मनः समसमस्थितम् ।। १५
यस्य खस्येव शून्यत्वं स महात्मेह तद्वपुः ।
भावाद्वैतपदारूढः सुषुप्तपरया धिया ।। १६
व्यवहार्यपि संक्षोभं नैत्यादर्शनरो यथा ।
आदर्शपुरुषस्येव व्यवहारवतोऽपि च ।। १७
न यस्य हृदयोल्लेखो मनागपि स मुक्तिभाक् ।
अविभागमिवादर्शे चिन्मणौ प्रतिबिम्बति ।। १८
चितेः परमनैर्मल्याद्व्यवहारो यथा गतः ।
चिच्चमत्कृतिरेवेयं जगदित्यवभासते ।। १९
नेहास्त्यैक्यं न च द्वित्वं ममादेशोऽपि तन्मयः ।
वाच्यवाचकशिष्येहागुरुवाक्यैश्चमत्कृतैः ।। २०
आत्मनात्मनि शान्तैव चिच्चमत्कुरुते चिति ।
चित्प्रस्पन्दो हि संसारस्तदस्पन्दः परं पदम् ।। २१
चित्स्पन्दशमनेनेयं परिशाम्यति संसृतिः ।
महाचित्ते नतेऽर्थौऽशभावा यो भावनाक्षयः ।। २२
असन्नपि स्वभावं तत्संवित्स्पन्द उदाहृतम् ।
शून्यत्वमजडं यत्तत्परमाहुश्चितेर्वपुः ।। २३

तत्त्वेन भावनायत्ता संसृतिः सानुभूयते ।

अभावनामात्रलयात्सा च निःसाररूपिणी ।। २४

केवलं केवलीभावात्तद्रूपा सैव शिष्यते ।

चित्स्पन्दमेव संसारचक्रप्रवहणं विदुः ।। २५

मातृमानप्रमेयादि कटकादीव हेमनि ।

पृथगस्ति न च स्पन्दश्चितेर्या संसृतिर्भवेत् ।। २६

चित्तमेव चितिस्पन्दस्तदबोधो हि संसृतिः ।

अबोधमात्रे चित्स्पन्दः कटकत्वमिवोत्थितम् ।।२७

बोधमात्रविलीनेऽस्मिञ्छुद्धा चिद्राम शिष्यते ।

स्वभावबोधमात्रेण क्षीयते भोगवासना ।। २८

भोगाभावनमेवेह परमं ज्ञत्वलक्षणम् ।

इतो नाभिमताः सर्वे ज्ञस्य भोगाः स्वभावतः ।। २९

भवन्ति कोऽतितृप्तो हि दुरन्नं किल वाञ्छति ।

एतदेव परं विद्धि ज्ञत्वस्यापरलक्षणम् ।। ३०

स्वभावेनैव भोगानां यत्किलानभिवाञ्छनम् ।

चित्तत्स्पन्दैव सर्वात्मरूपिण्यस्तीति निश्चयः ।। ३१

योऽन्तः प्ररूढः स्वभ्यासो ज्ञत्वशब्देन स स्मृतः ।

यो न भुङ्क्ते भुज्यमानानपि भोगान्स बुद्धिमान् ।

लोकानुरोधसिद्ध्यर्थं स हन्ति लगुडैर्नभः ।। ३२

विना कृत्रिमया बुद्ध्या न सिद्धिरवगम्यते ।। ३३

क्वचिदात्मावलोके च स्वाङ्गावदलनैरपि ।

चिच्चेत्यं चेत्यकोटिस्था तावत्पश्यति विभ्रमम् ।।३४

इदं यावदबोधात्मा स्पन्दते स्पन्दरूपिणी ।

सम्यग्बोधोदयोन्तः स्यात्स्पन्दास्पन्ददशाक्रमः ।।३५

क्वापि याति च संशान्तदीपवत्साभिधानकः ।

चितः प्रशान्तरूपाया दीपिकायाः स्वभावतः ।। ३६

स्पन्दास्पन्दमयी नेह कथैवास्ति मनागपि ।

यदस्पन्दस्य मरुतो न सन्नासन्न मध्यगम् ।। ३७

रूपं तदेवासंवित्तिस्पन्दायाः प्रशमं चितेः ।

अभिन्नः स्याच्चितः स्पन्दः शुद्धचित्स्फाररूपधृक् ।। ३८

न बन्धाय न मोक्षाय स्थित आत्मनि केवलम् ।

चिच्चेन्निरर्थसंवित्तिनिर्वाणे न च विन्दते ।। ३९

तद्बन्धमोक्षपक्षादेर्नामापीह न विद्यते ।

मोक्षोऽस्त्वित्येव बोधोऽन्तः पूर्णता क्षयकारणम् ।। ४०

समास्त्वित्यपि बन्धस्ते श्रेयोऽसंवेदनं परम् ।

यदनाभासमजडं तद्विद्धि परमं पदम् ।। ४१

चितः स्वरूपं संस्थानमचेत्योन्मुखतात्मकम् ।

यः संकल्पनशब्दार्थरूपः स्पन्दो महाचितः .।। ४२

बन्धमोक्षादिकार्होऽसौ प्रेक्ष्यमाणः प्रणश्यति ।

प्रेक्षणादेव संशान्ते त्वहंभावे निरास्पदे ।। ४३

न विद्मः केन किं कस्य बध्यते वाथ मुच्यते ।

संकल्प एव रचिते बुधश्चेदविभागवान् ।। ४४

तदसंकल्पमस्पन्दं सर्वं जातमवारितम् ।

स्पन्दे स्पन्दमये वाते तन्मयत्वात्सदा चिता ।। ४५

संक्षीणे न च संसारो निस्पन्दे चिद्धने स्थिते ।

चित्तेज एव चित्स्पन्द इति बुद्धे निरन्तरम् ।। ४६

व्यतिरिक्तश्चितः स्पन्दो न किंचिदवशिष्यते ।

अस्मिन्दृश्यमये दीर्घस्वप्ने स्वप्नान्तरं व्रजन् ।

न ज्ञो मोहमुपादत्ते सर्वगत्वात्स्वसंविदः ।। ४७

यत्रोदेति प्रसभमनिशं सर्गसंवित्तिसत्ता

यस्मिन्नेते सकलकलनाकारपङ्का गलन्ति ।

उद्यन्त्येते स्वदनसुभगं यत्र सर्वोपलम्भा

ध्यानेनैव तमवगमय प्रत्यगात्मानमन्तः ।। ४८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० प्रत्यगात्मावबोधो नामैकोनषष्टितमः सर्गः ।।५९।।